International Journal of Sanskrit Research 2015; 1(6): 12-14

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2015; 1(6): 12-14
© 2015 IJSR
www.sanskritjournal.com
Received: 11-07-2015
Accepted: 14-08-2015

**अमित कूमार साहा**
(गबेषकः, संस्कृत-पालि-प्राकृतबिभागः, विश्वभारती) अध्यापकः, संस्कृतबिभागः
महाराजाधिराज-उदयचॉद-महिलामहाविद्यालयः
बर्धमान-713104
पश्चिमबंग

**Correspondence**
**अमित कूमार साहा**
(गबेषकः, संस्कृत-पालि-प्राकृतबिभागः, विश्वभारती) अध्यापकः, संस्कृतबिभागः
महाराजाधिराज-उदयचॉद-महिलामहाविद्यालयः
बर्धमान-713104

# सीतोपनिषदि उपस्थापित शक्तिभावना

**अमित कूमार साहा**

मानबसंस्कृतेः सुप्राचीनपरिचयाबबोधबिषये वेदानां परिशीलनमपरिहार्यम्। भारतीयदर्शनानां मूलानि वेदेष्वेब विद्यन्ते। संहिता-ब्राह्मण-आरण्यक-उपनिषद्भेदैः वैदिकसाहित्यं समृद्धम्। अध्यात्मविद्यारहस्यप्रतिपादका वेदभागा उपनिषदः कथ्यते। भारतीयाध्यात्मविद्याया ज्वलन्ति रत्नाणि। महर्षयो यानि आध्यात्मिकतत्त्वानि ज्ञानदृशा साक्षादकुर्बन् तानि सर्वाणि तत्त्वान्यत्र वर्णितानि। उप-नि उपसर्गयुतात् सद् धातोरुपनिषच्छब्दनिष्पत्तिं सर्वैरङ्गीक्रियन्ते। यद्यपि भारतीयबाङ्मये प्रायश उपनिषद्-कृते रहस्यशब्दः प्रयुक्त इति अबलोक्यते। शङ्कराचार्यस्तु सद्-धातोर्विशरणावसादनगत्यार्थस्योपनपूर्वस्य क्विप् प्रत्ययान्तस्य रूपमुपनिषद् इति व्याख्यात। ब्रह्मविद्यासाक्षात्करणे सहायकत्वात् उपनिषद् ब्रह्मविद्या एव। यथा उपनिषच्छव्दार्थनिर्णये मतभेदाः परिलक्षितास्तथैव तत्संख्यानिर्धारणविषयेऽपि विवादाः वर्तन्ते। मुक्तिकोपनिषदि अष्टोत्तरशतोपनिषदाम् उल्लेख वर्तन्ते। अन्यत्र द्विशताधिकमपि उच्यते। परवर्तीकालीन-अप्रधानोपनिषद्समूहे भारतीयदर्शनस्य तथा ब्रह्मतत्त्वस्य ब्याख्या भिन्नरूपेण क्रियते। अथर्ववेदस्यान्तर्गतसीतोपनिषद् शाक्तोपनिषद्रूपेण परिगन्यते। अत्र शाक्तदर्शनस्य तत्त्वमारोपितम्। शक्-धातोः निष्पन्न शक्ति शब्दः ज्ञानसामर्थवाची। शक्तेरिदमिति शक्ति इति शब्दस्योत्तरं अण् इति तद्धितप्रत्यये शाक्तम्, शक्तिसम्बन्धि इत्यर्थः। ततः शाक्तं दर्शनमिति कर्मधारये शाक्तदर्शनमिति निष्पन्नम्। शक्तिसम्बन्धि दर्शनमित्यर्थः।

मानवात्मनि जिज्ञासायाः त्रिधारा प्रबहति—किमिदम्? कस्मै इदम्? कुत इदम्? मूलतत्त्वस्य बिभागत्रयं यथाक्रमे सृष्टितत्त्व-ब्रह्मतत्त्व-यज्ञतत्त्वरूपेण बिबिच्यते। शाक्तसम्प्रदायः जगतः सृष्टिप्रसङ्गे शक्तेः प्राधान्यमङ्गीकृतम्। उच्यते देवीभागवते—

> "शक्तिः करोति ब्रह्माण्डं सा बै पालयतेऽखिलम्।
> इच्छया संहरत्येषा जगदेतच्चराचरम्॥"(१/८/३७)

शक्तिर्हि समस्तजगत्प्रपञ्चानां देव्यवताराणाञ्च मूलकारणम्। शाक्तसम्प्रदायस्याभिमतेन शिवशक्तिसामरस्यवशात् जगतः उत्पत्तिः। शिवः सदा शक्तियुक्तो वर्तते। शक्तेरन्तर्मुखित्वे शिवः, शिवस्य च वहिर्मुखत्वे शक्ति अभिहिता। अन्तर्मुखत्वं वहिर्मुखत्वं चेति भाबद्वयं सनातनम्। शिवतत्त्वे तथा शैवदर्शने शक्तिभाबो गौणः, शिवभाबः प्रधानः। शक्तितत्त्वेऽपि शिवभाबो गौणः, शक्तिभाबः प्रधानः। परन्तु यत्र शिवशक्तोरेकरसस्तत्र द्वयोरप्यप्राधान्यम्। सैव साम्यावस्था, सैव शिवशक्तिसामरस्यम्। जगति देवीशक्तिरेव प्रधानमिति शाक्तस्याभिप्रायः। उच्यते वामकेश्वरतन्त्रे—

> "यस्य यस्य पदार्थस्य या या शक्तिरुदीरिता।
> सा तु सर्वेश्वरी देवी स च सर्वो महेश्वर॥"(७/३१)

ऋग्वेदस्यान्तर्गते देवीसूक्ते शक्तितत्त्वस्य वीजं निहितम्। अष्टमन्त्रात्मकदेवीसूक्तस्य ऋषिरम्भृणमहर्षेः कण्या ब्रह्मविदुषी वाक्, तपसा सा ब्रह्मशक्तिस्वरूपमात्मशक्तिमनुभूयावदत्—अहं ब्रह्मशक्तिर्ब्रह्ममयी विश्वेश्वरी जगत्स्वरूपेण विश्वं सर्वं सम्पादयामीति। इयं शक्तितत्त्वं वैदिकोत्तरकाले आगमादौ शास्त्रे सुस्पष्टरूपेण विकशितम्। वेद-उपनिषद्-तन्त्र-पुराणादौ शक्ति-शब्दः देवी-पराशक्ति-ईश्वरी-मूलप्रकृत्यादिना नाम्ना प्रजुय्यते। विश्वप्रसूतिस्वरूपा इयं शक्तिःविज्ञानानन्दघननिर्गुणब्रह्मरूपेण सगुणब्रह्मरूपेण च वर्णिता। उपनिषद्ग्रन्थेषु अथर्ववेदीयसीतोपनिषद् शाक्तोपनिषद्रूपेण परिगण्यते। रामायणे वाल्मीकिकृता सीता पातिव्रत्यादिभ्यः गुणेभ्यः साध्वी रमणीरूपेण सामाजिकानां मनो हरति। किन्तु सीतोपनिषदि सीता स्वयं शक्तिस्वरूपिणी। भगवतः रामचन्द्रस्य शक्तिरूपेण सीतायाः माहात्म्यमत्र वर्णितम्। सीतोपनिषदि सीता मूलप्रकृतिरूपेण वर्णिता। प्रकृतिविषये देवीभागवते वर्ण्यते—

> "प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
> सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता॥"(६/१/५)

"प्र" इत्युपसर्गः प्रकृष्टवाचकः, "कृति" शब्दश्च सृष्टिवाचकः। अतः या सृष्टिविषये प्रकृष्टस्वरूपा सा महादेवी प्रकृतिनाम्ना प्रसिद्धा। अथवा सृष्टेः पूर्वावस्थावाचकः "प्र" शब्दः "कृति" शब्दश्च सृष्टिवाचकः। सृष्टेरादौ या देवी देदीप्यमाना सा "प्रकृति" इत्युच्यते—

"प्रथमे वर्तते प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टेरादौ च या देवी प्रकृतिः सा प्रकीर्तिता॥"(६/१/८)

त्रिवर्णात्मका सीता साक्षान्मायामया। सकारस्योपरि श्रूयमानइकारस्यार्थः विष्णुरिति। सर्वसाक्षी विष्णुः प्रत्यगभेदेन सर्वं व्याप्नोति। ईश्वरचैतन्यं माया च इकारार्थ इत्युच्यते। सत्यम् अवितथं स्वरूपं वा, मरणधर्मरहितं, कर्मयोगभक्तिज्ञानफलप्राप्तिः, उमया सहित ईश्वरः सकारशब्दार्थः। अन्तिमवर्णतकारस्यार्थः शब्दराशिः सरस्वती। ब्रह्मा यं प्रणम्य भवसागरं तरन्ति सोऽयं विराट् प्रस्तरश्च तकारस्यार्थः। सीतोपनिषदि प्रजापतिना वर्ण्यते—

"सीता इति त्रिवर्णात्मा साक्षान्मायामया भवेत्।
विष्णुः प्रपञ्चबीजं च माया इकार उच्यते॥(३)
सकारः सत्यममृतं प्राप्तिः सोमश्च कीर्त्यते।
तकारस्तारलक्ष्म्या च वैराजः प्रस्तरः स्मृतः॥"(४)

सीता व्यक्ताव्यक्तोभयस्वरूपा। अव्यक्तरूपिणी महामाया अमृतमयावयवेन तथा दिव्यभूषणेन विभूषिते सति व्यक्तस्वरूपिणी भवति। सीता गुणसाम्यात्मना यदा व्यक्ता भवति तदा त्रिरूपादेव्याः प्रथमरूपं या द्विजानां वेदशास्त्राध्ययनकाले सरस्वत्यात्मना शब्दब्रह्ममयी भवति। उद्भवा सम्यग् ज्ञानयुक्तानरात्मिका वुद्धिः तस्याः द्वितीया शक्तिः। तस्याः तृतीयाशक्तिः इकारमयी-अव्यक्ता। उच्यते सांख्यदर्शने—सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। सीता प्रकृतिरूपेण वर्णिता सा अव्यक्ता च। सांख्ये यद्यपि प्रकृतिः अविकृतरूपेण वर्णिता परन्तु सीतोपनिषदि प्रकृतिरूपासीतायाः विकृतिः परिदृश्यते। पुरुषसान्निध्यवशात् यथा प्रकृतेः सिसृक्षा जायते तथैव अत्र पुरुषस्वरूपरामसंकल्पवशात् सीता व्यक्ता सति जगदोत्पादने समर्था भवति। बुद्ध्यादिव्यक्तं मूलप्रकृतिरूपं परमाव्यक्तं च उभयमपि सत्त्वरजस्तमांसि त्रिगुणसम्पन्नमिति सांख्यानामाशयः। गीतायामपि आह—

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भबा।
निवध्नन्ति महावाहो देहे देहिनमव्ययम्॥"(१४/५)

अत्रापि सीता व्यक्ताव्यक्तरूपा त्रिगुणसम्पन्ना। सा उत्पत्तिस्थितिविनाशकारिणी। प्रीत्यप्रीतिविषादात्मकाः सत्त्वरजस्तमांसि गुणाः। तेषां कार्याणि यथाक्रमेण प्रकाश-प्रवृत्ति-नियमार्थाः। प्रकाशः बोधः वा सत्त्वगुणस्य, प्रबृत्तिः क्रिया वा रजोगुणस्य, नियमः आच्छादनं वा तमगुणस्य कार्यम्। यदा सत्त्वगुणेन अपरगुणद्वयं दुर्वलीकृतं तदा जगतः उत्पत्तिः सृष्टिर्वा भवति। रजोगुणेन सत्त्वतमगुणद्वयस्य अभिभवे जगतः स्थतिः, एवं तमोगुणेन जगतः संहारः भवति। तस्मात् प्रकृतिस्वरूपा सीता जगदाधारकारिणी। अस्मिन् प्रसङ्गे देवीभागवते उच्यते—

"गुणे सत्त्वे प्रकृष्टे च प्रशब्दो वर्तते श्रुतः।
मध्यमे रजसि कृश्च तिशब्दस्तमसि स्मृतः॥(६/१/६)
त्रिगुणात्मस्वरूपा या सा च शक्ति समन्विता।
प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते॥"(६/१/७)

गुणत्रयस्य मध्ये विमलज्ञानप्रकाशकत्वेन सर्वोत्कृष्टः "प्र"-शब्दः सत्त्वगुणवाचकः। मध्यमः "कृ"-शब्दः विक्षेपदोषात्मकस्य रजोगुणस्य वाचकः। तमोगुणो हि ज्ञानावरकत्वेनाधमः, तस्य वाचकः "ति"-शब्दः। अतः निरतिशयविक्षेपावरणदोषरहिता गुणातीता सा चिन्मयी ब्रह्मरूपिणी यदा चोक्त-लक्षणाक्रान्ता गुणत्रयसमन्विता सर्वशक्तिसम्मिलिता भवात्तदा तदा सा सृष्टिकार्ये प्रधाना प्रकृतिरुच्यते। सीतोपनिषदि मूलप्रकृतिसंज्ञिता सीताविषये प्रजापतिना आह—

"श्रीरामसान्निध्यवशाज्जगदाधारकारिणी।
उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम्॥"(७)

सीतोपनिषदि सीतायाः ब्रह्मतत्त्वं वर्णितम्। सा सीता "सर्ववेदमयी सर्वदेवमयी सर्वलोकमयी सर्वकीर्तिमयी सर्वधर्ममयी सर्वाधारकार्यकारणमयी महालक्ष्मीर्देवेशस्य भिन्नाभिन्नरूपा चेतनाचेतनात्मिका तद्गुणकर्मविभागभेदाच्छरीररूपा देवर्षिमनुष्यगन्धर्वरूपा असुरराक्षसभूतप्रेतपिशाचभूतादिभूतशरीररूपा भूतेन्द्रियमनःप्राणरूपेति विज्ञायते।"(१०) सर्वं खल्विदं ब्रह्मेति वेदान्ततत्त्ववत् सीता ब्रह्मरूपेण प्रतिपादिता।

शक्त्यात्मना सीता इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्तिभेदेभ्यः त्रिविधा भवति। यस्मात् विश्वचराचरमभिव्यक्तम्। इच्छाशक्तिस्त्रिविधा—श्र्यात्मना भद्ररूपिणी, भूम्यात्मना प्रभावरूपिणी, नीलात्मना सोमसूर्याग्निरूपा भवति। सोमरूपानीला ओषधीनां प्रभवति। सा कल्पवृक्षपुष्पफललतागुल्मात्मिका औषधभेषजात्मिका अमृतरूपा। औषधभेषजात्मिका सोमरूपानीला सकलजीवं रक्षति। सा अमृतस्वरूपा देवानां परापरविद्यारूपस्तत्फलप्रदा। सूर्यरूपानीला सकलभूवनप्रकाशिनी। सा कालचक्रं जगच्चक्रमित्यादिप्रकारेण चक्रवत् परिवर्तमाना। सा प्रकाशरूपा कालरूपा च। अनुरूपमुक्तिः देव्याः सर्वव्यापकताप्रसङ्गे देवीपुराणेऽपि दृश्यते—

"समयेन ऋतुमासपक्षाहादिक्रमेण तु।
सूक्ष्मस्थूलबिभागेन देवी सर्वगता विभो॥"(२४/१)

अग्निरूपा नीला प्राणिनाम् अन्नपानादेः निमित्तं क्षुत्तृष्णात्मिका। सा देवानां सुखरूपा वनौषधीनां शीतोष्णरूपा काष्ठेष्वन्तर्बहिश्च नित्यानित्यरूपा भवति।

परमार्थनित्या चित्शक्तिः श्रीभूमिनीलात्मकं त्रिविधं रूपं धारयित्वा भगवत्संकल्पानुगुण्येन लोकरक्षणार्थं प्रवृत्ता। श्रीदेवी लक्ष्मीरूपेण विज्ञायते। भूदेवी ससागरा वसुन्धरा भूरादिचतुर्दशभूवनानामाधाराधेया स्वेनरूपेण प्रणवात्मिका भवति। नीलारूपा इच्छाशक्तिः सर्वतोमुखतया विद्युन्मालिनी भूत्वा सर्वौषधीनां सकलप्राणिनां पोषणार्थं सर्वरूपा भवति।

सीतायाः क्रियाशक्तेर्नादोद्भवः। यया सर्वं क्रियते सेयं क्रियाशक्तिः। भगवतः श्रीहरेर्मुखाद् वैखरीप्रपञ्चहेतुरूपनादः प्रादुर्भवति। तदव्याक्तरूपात् नादात् महदात्मकः विन्दुर्जायते। तथाविधविन्दोः अहंकारात्मकः ओङ्कारः। ओङ्कारात् परतो रामः वैखानसवालखिल्यादि- मौनिपटलाश्रयसच्चिदानन्दपर्वतो भवति। तथाविध परमात्मनि कर्मोपासनाज्ञानकाण्डप्रकाशकैः ऋगादिचतुर्वेदतरुभिः सञ्जाताः वहवः शाखा। एवंविध वक्तव्यं वर्ण्यते शारदातिलके—

"सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद् विन्दुसमुद्भवः॥"(१/७)

चराचरात्मकमिदं शब्दार्थरूपं जगत् शक्तिजन्यम्। नादः शिवशक्त्यात्मकेति तान्त्रिकमतमनुसृत्य सीतोपनिषदि वर्ण्यते-"हरेर्मुखान्नादः"। परमात्मस्वरूपहरेः मुखे सीतायाः क्रियाशक्तिः नादरूपेण प्रकटीभूता। अतः सीतायाः क्रियाशक्तिःशब्दब्रह्मरूपेण प्रकाशिता। या पुरा वेदशास्त्ररूपेण विजृम्भिता सा प्रणवात्मना लीयते। तथाविध प्रणवः विन्द्वात्मना, विन्दु नादात्मना, नादो विष्ण्वात्मना। विष्णुः व्याप्यव्यापककलनापह्नवसिद्धं ब्रह्ममयं रूपं क्रियते।

साक्षाच्छक्तिर्नाम ज्ञानशक्तिः। सा भगवतः साज्ञदृष्टया आविर्भावतिरोभाव-निग्रहानुग्रहतत्कलनाशान्तितेजोरूपा व्यक्ताव्यक्तप्रपञ्चकारणीभूतचरणादिसमग्रावयवसंपन्ना सृष्ट्यादिप्रपञ्चकृत्यकरणसमर्था सती सर्वशक्तिसामर्थ्यात् साक्षाच्छक्तिः इत्यभिधीयते।

पुनः योगभोगवीरशक्तिभेदेभ्यः इच्छाशक्तिस्त्रिविधा। सा योगशक्तिः प्रलयावस्थायां स्वविश्रमणार्थं भगवतः दक्षिणवक्षे श्रीवत्साकृतिर्भूत्वा विश्रम्यति। भोगरूपाशक्तिः पद्मनिध्यादिनवनिधिसमाश्रिता सती भगवतः भोग्ययोग्या भवति। न केवलं भगवतः, अपि तु तद्भक्तानामपि भोग्ययोग्या इयं भोगशक्तिः। भोगरूपाशक्तिः भक्तानां नित्यनैमित्तिककर्मभिः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभिः

पितृपूजादिभिः भगवत्प्रीत्यर्थमुक्त्वा सर्वं क्रियते। तस्मात् इयं शक्तिः व्याक्तरूपा सती कर्ममार्गे देवान् नरान् च प्रेरयति। नित्यकर्मानुष्ठानात् धर्मोत्पत्तिः, धर्मोत्पत्तेः पापहानिः, ततः चित्तशुद्धिछः, अथ संसारयाथात्म्याववोधः, अनन्तरं वैराग्यं, तस्मात् मुमुक्षुत्वम्, ततः तदुपायपर्य्येषणं, ततः सर्वकर्मसन्न्यासः, अस्मात् सन्न्यासात् योगाभ्यासः, ततः चित्तस्य प्रत्यक्प्रवणता, अनन्तरं तत्त्वमस्यादिवाक्यार्थपरिज्ञानम्, ततः अविद्योच्छेदः, अथ स्वात्मनि अवस्थानम् इति नैष्कर्मसिद्धौ उक्तम्। उक्तञ्च वेदान्तसारे—"एतेषां नित्यादीनां वुद्धिशुद्धिः परं प्रयोजनम्"। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः अष्टानि योगाङ्गानि योगदर्शने आलोच्यन्ते। पातञ्जलदर्शने आह—"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः"(२/२८)। यमनियमादीनाम् आचरणात् क्लेशादिनिवृत्तौ विवेकज्ञानपर्यन्तं तत्त्वज्ञानस्याभिव्यक्तिर्भवतीत्यर्थः। वाचष्पतिमहोदयेन आह—"प्राप्तिकारणं योगाङ्गानुष्ठानं विवेकख्यातेः। वियोगकारणं तदेवाशुद्धेः"। सीतायाः भोगशक्त्या मनुष्यवर्गाः मोक्षलाभार्थमुपायं लभन्ते। सीतायाः वीरशक्तिः चतुर्भूजमूर्त्तिमती सती देवानां नरानां च साधनानिमित्तमाविर्भवति। सा वीरशक्तिः सर्वैः देवैः परिवृता कल्पतरुमूले चतुर्भिर्गजैः रत्नघटैरमृतजलैः अभिषिच्यमाना सकलदेवतैः ब्रह्मादिभिः वन्द्यमाना अनिमाद्यष्टैश्वर्ययुता भवति। पूर्णिमाऽमावश्याभ्यां छत्रेण ह्लादिनीमयाभ्यां चामरेण स्वाहास्वाधाभ्यां व्यजनेन भृगुपुण्यादिभिः अभ्यचर्यमाना सा देवी सकलकारणकार्यकरी लक्ष्मीरूपं धारयति। वीरलक्ष्मी इति शक्ते आराधनं कृत्वा देवतावर्गः मनुष्यवर्गश्च मुक्तिं लभते। सीता तस्याः इच्छा-ज्ञान-क्रियाशक्तिभिः सर्व्वेभ्यः चतुर्वर्गफलं प्रददाति। पद्मासनादेव्याः शक्तेः माहात्म्यविषये देवीपुराणे वर्ण्यते—"पद्मस्था चर्च्चिका रौप्या धर्म्मकामार्थमोक्षदा"(२३/१६)।

सीतोपनिषदि सीतायाः शक्तयः वाहुल्यं माहात्म्यम् च उपस्थापितम्। जगद्सृष्टौ नारीशक्तेः महनीयता वैदिग्ऋषीणाम् अन्तर्दृष्ट्या अनुभूयते। आगमादौ शास्त्रे नारीशक्त्याः प्राधान्यमधिकतरम्। वैदिकोत्तरकाले रचितायां सीतोपनिषदि तान्त्रिकप्रभावः परिदृश्यते। तन्त्रशास्त्रेषु शाक्तोपपुराणेषु च मातृशक्तेः तथा देवीशक्तेः वर्णना विशदीकृता। विश्वसंसारे स्त्रीणामावश्यकतामनुभूय शक्तिस्वरूपिणीतेषां तत्त्वाकारेण धर्मशास्त्रे तथा दर्शने उपस्थापिता। सीतोपनिषदि अपि रामाचन्द्रेभ्यः सीतायाः प्राधान्यमधिकतरं वर्णितम्। अतः यथार्थमेव उक्तम्—

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाक्रियाः॥"(मनुसंहिता ३/५६)

**ग्रन्थपञ्जी**


1. Sastri, A Mahadev. The Sakta Upanisads. Madras: The Adyar Library, 1950.
2. शर्मा, श्रीराम। 108 उपनिषद् (साधना खण्ड)। बेरली: संस्कृति संस्थान, 2013.
3. कवीराज, गोपीनाथ। तान्त्रिक साधना ओ सिद्धान्त। बर्धमान: बर्धमान विश्वविद्यालय, 2009।
4. कवीराज, गोपीनाथ। भारतीय साधनार धारा। कलकाता: संस्कृत कलेज, 1975(द्वितीय सं)।
5. दास, उपेन्द्रकुमार। शास्त्रमूलक भारतीय शक्ति साधना(प्रथम खण्ड)। कलकाता: विश्वभारती गवेषणा ग्रन्थमाला, 1391 वंगाब्द।
6. दास, उपेन्द्रकुमार। शास्त्रमूलक भारतीय शक्ति साधना(द्वितीय खण्ड)। कलकाता: विश्वभारती गवेषणा ग्रन्थमाला, 1395 वंगाब्द।
7. दासगुप्त, शशिभूषण। भारतेर शक्ति साधना ओ शाक्त साहित्य। कलकाता: शिशु साहित्य संसद, 2012।
8. देवीभागवतम्। पञ्चानन तर्करत्न सम्पादित। कलकाता: नवभारत, 1401 वंगाब्द।
9. देवीपुराणम्। पञ्चानन तर्करत्न सम्पादित। कलकाता: नवभारत, 1400 वंगाब्द।
10. मनुसंहिता। अनुवादक- सुरेशचन्द्र वन्दोपाध्याय। कलकाता: आनन्द, 2002(द्वितीय मुद्रण)।
11. सांख्यकारिका। पूर्णचन्द्र वेदान्तचुञ्चु सम्पादित। कलकाता: पश्चिमवंग राज्य पुस्तक पर्षत्, 2007(द्वितीय मुद्रण)।
12. पातञ्जल दर्शन। पूर्णचन्द्र वेदान्तचुञ्चु सम्पादित। कलकाता: पश्चिमवंग राज्य पुस्तक पर्षत्, 2005(द्वितीय मुद्रण)।
13. श्रीमद्भगवद्गीता यथायथ। अनुवादक-श्रीमत् भक्तिचारु स्वामी। नदीयाः भक्तिवेदान्त वुक ट्रास्ट, 2011।
14. वेदान्तसार। लोकनाथ चक्रवर्ती सम्पादित। कलकाता: पश्चिमवंग राज्य पुस्तक पर्षत्, 2011।
15. Woodroffe, John. Sakti And Sakta. Delhi: Oriental Book Center, 2006.
16. Woodroffe, John. The Surpent Power. Madras: Gonesh and Company, 2006.